### १.१.२९. क्षितीशचन्द्रचट्टोपाध्यायः (१८९६)

गिरिवाला-शरच्चन्द्रयोः पुत्रः क्षितीशचन्द्रचट्टोपाध्यायः १८९६ ईसवीयसंवत्सरे नभेम्बरमासस्य चतुर्विंशतिदिनाङ्के कलिकातायां जोडासाङ्को इत्यत्र जातः। १९१८ ईसवीयसंवत्सरे कलिकाताविश्वविद्यालयात् स्नातकोत्तरपदवीं प्राप्य संस्कृतव्याकरणे प्रकृष्टाध्ययनार्थं डि.लिट् उपाधिमपि अवाप। कानिचन दिनानि दक्षिणसुवर्वनकलेजे (अधुना आशुतोषकलेज) कार्यं कृत्वा कलिकाताविश्वविद्यालये अध्यापकरूपेण नियुक्तस्तत्रैव पञ्चत्रिंशद् (३५) वर्षाणि असेवत। भाषाविज्ञाने व्याकरणे चास्य अगाधपाण्डित्यमासीत्। अस्य प्रसिद्धा ग्रन्थाः सन्ति- षष्टितन्त्रम्, Technical Terms and Technique of Sanskrit Grammar, Greek Proverbs, Popular Etymology। सम्पादितग्रन्थाः सन्ति- Patanjali's Mahabhasya, Vedic Selections.

अस्य प्रकाशितो कथाग्रन्थ आसीत् 'षष्टितन्त्रम्' यत्र षष्टिः(६०) कथाः सन्ति। एतासु काश्चन मौलिक्यः काश्चन अनूदिताः। (अनूदिता यथा- स्वर्णमृगः, शकुन्तला, समाप्तिः, अध्यापकः, यज्ञेश्वरस्य यज्ञः, मुक्तेरभ्युपायः, विहगयुगलम्)। एतासु काश्चन संस्कृतसाहित्यपरिषत्पत्रिकायां मञ्जूषायां च प्रकशिताः। कानिचन रवीन्द्रकाव्यानि अप्यनेन अनूदितानि। अस्य सम्पादनेन 'Calcutta Oriental Journal' मञ्जूषापत्रिका च निरन्तरं प्रकाशिते भवतः स्म। तस्य हास्यरसात्मकं नाटकम् 'अन्धैरन्धस्य यष्टिः प्रदीयते' (मञ्जूषा, १९५५) इति। अस्मिन् नाटके मुकुन्दानन्दगोविन्दस्वामी वाराणसीत आहूत आसीत्, राज्ञः खल्वाटत्वनिवारणाय। प्रथमतः होमेन स्वपापपरिष्काराय स्वामी राजानम् उपादिशत्। तदनु दानभोजनादीनां व्यवस्था करणीया। राजा तस्य समस्तप्रस्तावेषु सम्मत आसीत्। स्वामिवर्यस्य अत्यानन्दकारणात् मस्तकस्य शिरस्त्राणमधःपतितं जातम्। तस्य वञ्चनाया अवगमनात् पूर्वं स पलायितः। एवं साधारणवस्तु नीत्वा सफलो नाट्यकारः सरलतरलभाषया स्वलक्ष्यं संसाध्य आधुनिकनाट्यकारेषु स्वीयं स्थानं कल्पयति।

### १.१.३०. पञ्चाननरायः (१९०२-१९७६)

पश्चिमवङ्गस्य मेदिनीपुरजनपदे वासुदेवपुरे सतीशचन्द्रविद्यारत्नस्य पुत्रत्वेन जातः, काव्ये ज्योतिषे प्रत्नतत्वे साहित्ये संस्कृतौ च रुचिशीलो ज्योतिर्विनोद-परिव्राजकादिविरुदैः सम्भूषितो वैदेशिकैरपि डेभिडमाक्युसनादिभिः सभाजितो